षोडशोपचारभैरवपूजा

नं० १२६२

5722
F-3

Complete

Sharma

नं० ~~१११~~ ११८

(षोडशोपचारभैरवपूजा)

नं० १२८२ क षोडशोपचारभैरवपूजा
३ पत्राणि

ॐ श्रीगणेशाय नमः ॐ नमो भैरवाय ॐ अथ षोडशो
१ पचारैर्भैरवार्चनं आवाहयाम्यहं देवं वटुकेशं महाबल
म् सुन्दरास्यं श्वेतवर्णं भैरवं तं नमाम्यहम् इत्यावाहनं १
पाद्यं गृहाण देवेश भक्तानां वरदायक प्रसीद त्वं हि भक्ते
शात्तस्मात्पाद्यं ददाम्यहम् इति पाद्यम् २ वीरेश जगतां
वंद्य देवीपुत्र महाबल अर्घ्यं गृहाण देवेश संपत्सर्वार्थ।
साधक इत्यर्घ्यम् ३ सुरासुरनमत्पादयुग्म सर्वाभय।
प्रद प्रसन्नो मधुपर्कं मे गृहाण त्वं प्राज्ञुर्वं दहन् इति मधुप
र्कः ४ आचम्यतां महाभाग हृदयांभोजसंस्थित स्वादुः

स्वच्छं जलं शंभो वटुकाख्य महेश्वर इत्याचमनम् ५ गं
गादि सर्व तीर्थेभ्यो हृतं तोयं मयाप्रभो स्वामिन्स्नाना
र्थमस्मत्तो गृह्यतां स्नाहि भैरव ६ इति स्नानम् चीनां
शुकयुगं हृद्यं वस्त्रं लोहितमद्भुतं ससूत्रं रंजितं शुद्धं गृ
हाण वीर पूजित इति वस्त्रम् ७ सुगंधकुंकुमाद्यैश्च यु
क्तं चंदनमुत्तमम् प्रीत्यर्थं ते विभो प्रीतो गृहाण कुलना
यक इति गंधम् ८ अक्षता धवलाः श्रेष्ठाः रंजिताश्च म
नोरमाः गृहाण देवदेवेश सर्वविघ्नप्रणाशन इत्यक्ष
ता ९ मनोरमाणि पुष्पाणि तव प्रीतिकराणि च गृहाण

देवदेवेश प्रसन्नो भव सर्वदा इति पुष्पाणि ९ वनस्प
२ तिरसोत्पन्नो गंधाढ्यो गंध उत्तमः आघ्रेयः सर्वदेवा
नां गृहाण धूपमीश्वर इति धूपम् ११ वटुकेश महारा
२ जराजराजाधिपूजित दीपं गृहाण मद्भक्त्या भैरव प्रीय
तां प्रभो इति दीपम् १२ हृद्यं स्वादु सुधातुल्यं मधु
रं च यथोचितम् भक्तदेवगणैः सार्धं नैवेद्यं प्रीयतां।
मम इति नैवेद्यम् १३ जय श्री भैरव स्वामिन् जय भूत
पते प्रभो तव दर्शनतो जातः कृतकृत्योहमीश्वर इति
नीराजनम् १४ यानि कानि च पापानि ब्रह्महत्यादि।

कानिच तानि तानि प्रणश्यंति भैरवस्य प्रदक्षिणात्
इति प्रदक्षिणम् १५ नमो नमस्ते देवेश बटुकेश जयप्र
द व्योमव्यापिन्नमस्तेस्तु त्रैलोक्यव्यापिने नमः इति न
मस्कारः १६ गच्छ गच्छ सुरश्रेष्ठ बटुकेश महाबल स्व
स्थानं देवदेवेश पुनरायाहि शंकर इति विसर्जनं १७
इति षोडशोपचार भैरवपूजा समाप्ता श्रीरस्तु ।ः।

३

3

